# संपूर्ण शनि स्तोत्र | By Varsha Srivastav |

ॐ श्री गणेशाय नमः

अस्य श्री शनैश्चर स्तोत्रस्य
देवता त्रिष्टुप् छन्दः
शनैश्चर प्रीत्यर्थे जपे विनियोगः।

श्री दशरथ उवाच

कोणान्तको रौद्रयमोऽथ बभ्रुः
कृष्णः शनिः पिङ्गलमन्दसौरिः।
नित्यं स्मृतो यो हरते च पीडां
तस्मै नमः श्री रविनन्दनाय॥

सुरासुराः किन्नरपन्नगेन्द्राः
गन्धर्वविद्याधरपन्नगाश्च।
पीडयन्ति सर्वे विषमस्थितेन
तस्मै नमः श्री रविनन्दनाय॥
तस्मै नमः श्री रविनन्दनाय॥

नरा नरेन्द्राः पशवो मृगेन्द्राः
वन्याश्च ये कीटपतङ्गभृङ्गाः।
पीडयन्ति सर्वे विषमस्थितेन
तस्मै नमः श्री रविनन्दनाय॥

देशाश्च दुर्गाणि वनानि यत्र
सेनानिवेशाः पुरपत्तनानि।
पीडयन्ति सर्वे विषमस्थितेन
तस्मै नमः श्री रविनन्दनाय॥
तस्मै नमः श्री रविनन्दनाय॥

तैलैरभ्यङ्गैः शगुनप्रदानैः
लोहैर्नीलैर्वसनैः सुनीलैः।
प्रीणाति मन्त्रैर्निजवासरे च
तस्मै नमः श्री रविनन्दनाय॥

प्रयागकूले यमुनातटे च
सरस्वती पुण्यजले गुहायाम्।
यो योगिनां ध्यानगतोऽपि सूक्ष्मः
तस्मै नमः श्री रविनन्दनाय॥
तस्मै नमः श्री रविनन्दनाय॥

अन्यप्रदेशात् स्वगृहं प्रविष्टः
तदीयवारी नरः सुखी स्यात्।
गृहात् गतो यो न पुनः प्रयाति
तस्मै नमः श्री रविनन्दनाय॥

सृष्टिस्थितिध्वंसकरोऽपि देवः
त्राता हरिः संहरते पिनाकी।

एकस्त्रिधा ऋग्यजुःसाममूर्तिः
तस्मै नमः श्री रविनन्दनाय ॥
तस्मै नमः श्री रविनन्दनाय ॥

शन्यष्टकं यः पठते प्रभाते
नित्यं सुपुत्रैः पशुबान्धवैश्च ।
पठेच्च सौख्यं भुवि भोगयुक्तः
प्राप्नोति निर्वाणपदं परं सः ॥

कोणस्थः पिङ्गलो बभ्रुः
कृष्णो रौद्रान्तको यमः ।
सौरिः शनैश्चरो मन्दः
पिप्पलादेन संस्तुतः ॥

एतानि दश नामानि प्रातरुत्थाय यः पठेत् ।
शनैश्चरकृता पीडा न कदाचिद् भविष्यति ॥

https://bhaktivandana.com/lyrics/%e0%a4%b8%e0%a4%82%e0%a4%aa%e0%a5%82%e0%a4%b0%e0%a5%8d%e0%a4%a3-%e0%a4%b6%e0%a4%a8%e0%a4%bf-%e0%a4%b8%e0%a5%8d%e0%a4%a4%e0%a5%8b%e0%a4%a4%e0%a5%8d%e0%a4%b0-by-varsha-srivastav/